[1]अपजिज्ञासमानः, [सर्पिषो] जिज्ञासमानः, [शतं] सञ्जिज्ञासमानः, [सहस्रं] प्रतिजिज्ञासमानः, [औषधस्य] [2]अनुजिज्ञासमानः, जाज्ञायमानः ;

[3][शतं] अपज्ञास्यमानः, ज्ञापयिष्यमाणः-ज्ञपयिष्यमाणः, जिज्ञपयिषिष्यमाणः-ज्ञीप्सिष्यमाणः, [शतं] अपजिज्ञासिष्यमाणः, जाज्ञायिष्यमाणः ;

[4]सुज्ञाः-सुज्ञौ-सुज्ञः ; — — —

[A]ज्ञातम्-ज्ञातः-ज्ञातवान्, ज्ञापितः-ज्ञपितः- [5]ज्ञप्तः, जिज्ञपयिषितः-ज्ञीप्सितः, जिज्ञासितः, जाज्ञायितः-तवान् ;

[6]ज्ञः, [B]अज्ञः, [7]पथिप्रज्ञः,[C] [8]प्राज्ञः, [D]अभिज्ञः, [9]नयज्ञः,[E]

---

1. अत्र सर्वत्र ' पूर्ववत् सनः ' (1-3-62) इत्यात्मनेपदं, शानच् ।
2. ' मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते, नोत्तरान् ' (परिभाषा 62) इति न्यायेन '**नानोर्ज्ञः**' (1-3-58) इति निषेधः, ' ज्ञाश्रुस्मृदृशां सनः ' (1-3-57) इत्यस्यैव बाधकः, न तु ' पूर्ववत् सनः ' (1-3-62) इत्यस्य ; तेन ' पूर्ववत्—' (1-3-62) इति शानच् भवति ।
3. ' अपह्नवे ज्ञः ' (1-3-44) इति शानच् । एवं पूर्वोक्तेषु सर्वेष्वप्युदाहरणेषु स्यप्रत्यये शानजन्तानि रूपाणि स्वयमूह्यानि ।
4. क्विपि, रुत्वविसर्गौ भवतः । आकारान्तोऽयं शब्दः ।
5. ' वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ' (7-2-27) इति ण्यन्तात् निष्ठायां मित्त्वपक्षे इडभावो विकल्पेन निपातितः । तेन रूपद्वयं बोध्यम् ।
6. ' इगुपधज्ञाप्रीकिरः कः ' (3-1-135) इति कर्तरि कप्रत्ययः । आदन्तलक्षणण-प्रत्ययस्यापवादः ।
7. प्रकर्षेण पन्थानं जानातीति **पथिप्रज्ञः** । ' प्रे दाज्ञः ' (3-2-6) इति कप्रत्ययः । ' **आतो** लोप इटि च ' (6-4-64) इति आकारलोपः ।
8. ' **आत**श्चोपसर्गे ' (3-1-136) इति कप्रत्ययः । आकारलोपः । प्रकर्षेण आ = समन्तात् जानातीति **प्राज्ञः**=पण्डितः ।
9. '**आतो**ऽनुपसर्गे कः' (3-2-3) इति कर्मोपपदे कर्तरि कप्रत्ययः । आकारलोपः ।

A. ' न ज्ञातं तात यत्नस्य पौर्वापर्यममुष्य ते । ' **किरातार्जुनीये** 11.42.

B. ' व्रीताशबृंहितजुषाभ्रिणता गजेन प्रक्षेतुमज्ञमनसा समनुद्रुतेन । ' धा. का. 3.9.

C. ' विश्वासप्रदवेषोऽसौ **पथिप्रज्ञः** समाहितः । ' भ. का. 6.90.

D. ' इन्द्रजिद्विक्रमा**भिज्ञो** मन्वानो वानरं जितम् ॥ ' भ. का. 9.52.

E. ' इति विविधमुदासे सव्यसाची यदस्त्रं
बहुसमर**नयज्ञः** सादयिष्यन्नरातिम् । ' **किरातार्जुनीये** 16.63.